# बीजाक्षर जप

*राग : कल्याणि          ताळं : आदि*

सृष्टिस्थितिलय - कारण कारिणि - कलवाणि
शांकरि शांभवि - वाग्भवि वैष्णवि - वरवेणि
श्रीचक्रांतर - सुरगण विनुते - शुकपाणि
गुरुवररूपे - सच्चिदानंदे - गुणधानि

**पल्लवि:** बीजाक्षरजप प्रमुदित हृदये
बिंदुनिवासिनि शिवपत्नि

**चरणं:**

विधिमुख वासिनि - विधुशतभासिनि
विद्योल्लासिनि श्रीवाणि
श्रित हरि हृदये जितरिपुवलये
धृतसुरनिचये श्रीलक्ष्मि
शिव वामांगे - विहितासंगे
करुणाभंगे श्रीदुर्गे
सर्वश्चरिते - प्रभवति किल ते
शक्त्या महिते - परशक्ते ...१

कर धृतशूले - सुरवरपाले -
चिरतर लीले - शर्वाणि
मृगपति वाहे - शमितविमोहे
हिमगिरिगेहे - गीर्वाणि
हिमकरशीर्षे समुदितहर्षे -
शुभचयवर्षे - ब्रह्माणि
त्रिणयनशोभे - विपुलतराभे -
सच्चिदानंदे कल्याणि ...२